International Journal of Sanskrit Research 2020; 6(1): 209-213

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 209-213
© 2020 IJSR
www.anantaajournal.com
Received: 19-11-2019
Accepted: 23-12-2019

ईश्वर प भट्ट

प्राध्यापकाः सि. एल्. वाय्. संस्कृत कालेज्, धारवाड, कर्नाटक, भारत ।

Corresponding Author:
ईश्वर प भट्ट

प्राध्यापकाः सि. एल्. वाय्. संस्कृत कालेज्, धारवाड, कर्नाटक, भारत ।

# मोक्षसाधनसामग्र्यां भक्तेः साद्यसाधनविचार

ईश्वर प भट्ट

**शोधसार**

विधित मेतत् समेषां जनानाम् दुःख निवृत्ति पूर्वक सुखमवाप्तये, सतत प्रयत्न्य इति। तादृश दुःख निवारणं परम सुख अवाप्तिश्च मोक्ष एव। मानवः विचारजीवी। स मतिबलेन जीवनं सुखमयं कर्तुं क्षमते। जीवनं ऐहिकं पारमार्थिकञ्च। आस्तिकस्तु उभयजीवनं सुखमयं कर्तुं प्रयतते। दृष्टचरं एतत् ऐहिक जीवनाभिवृध्यै लौकिक साधनैः प्रयतमानोऽपि विपलीभवतीति। अतः अस्मत् प्रयत्न सफलतायै अदृष्ट साधनान्तरमावश्यकमिति ज्ञायते सैव भगवत् कृपा प्राकृतन पुण्यमिति चिकीर्त्यते। इदञ्च साधयितुं वेदाः स्मृतयश्च मार्गदर्षिकाः सन्ति। मार्गश्चत्वारः विद्यन्ते। सर्वेमार्गाः सर्वेषां न सुलभः। परन्तु भक्तिमार्गः सर्वेषां सुलभतया आचरितुं शक्यते। भक्तिर्नाम महामहिम्नि परमेश्वरे निरतिशयं प्रेमैव। इदं निरतिशयं भगवत् प्रेमैव मोक्षं साधयितुं भगवदनुग्रहं प्राप्तुं अतिशय सुलभमार्गः।

**मूलशब्दः** मोक्षसाधनसामग्र्यां, साद्यसाधनविचार, निवारणं

**प्रस्तावना**

“सर्वेभद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत्।“ अस्मिन् विरञ्चिप्रपञ्चे सर्वेपि जीविनः सुखं मे भूयात् दुःखं मनागपि मा भूयादिति अभिलषन्ति । परन्तु भूयसा लोकः ऐन्द्रियसुखे एव प्रवर्तते नतु अतीन्द्रिये । पुनः केचन लौकिकं सुखं नश्वरं मत्वा पारलौकिकमेव अन्वेषमाणा वर्तन्ते । इदानीं सम्पूर्णविश्वे शान्तिमयवातावरणस्य महान् चीत्कारः श्रूयते । परन्तु आधुनिकतायाः प्रभावेण भ्रान्ताः मनुजाः मानवतामार्गं परित्यज्य अनिश्चितरूपेण विकासाय च प्रवर्तन्ते । यस्य परिणामेन स्वल्पाः अनैतिककार्यं कृतवन्तोपि नैव विजानन्ति, दृष्ट्वा अपि नैव पश्यन्ति, श्रुत्वापि न श्रुण्वन्ति । त्यक्त्वापि न त्यजन्ति मानवानाम् प्रवाहेऽस्मिन् न दृश्यते कोपि मार्गः न तु कर्तव्यम् । राष्ट्रद्रोहिणां राक्षसप्रवृत्तिजनानां, विश्वविनाशकारिणाम् अस्त्राणां विकासात् विभीषणतया कम्पमाना दृश्यते

मानवता । फलतः सर्वे मानवाः शान्तिलाभार्थं इतस्ततः धावन्ति। अतः महती खल्वावश्यकता प्रतिभाति विश्वशान्तेः । विश्वस्य संपूर्णानि राष्ट्राणि स्वार्थपरतया स्वकीयस्वार्थसाधनायाः अवसरे अन्येषां राष्ट्राणां शोषणं कर्तुं वाञ्छन्ति । प्रबलानि राष्ट्राणि निर्बलराष्ट्राणां संपूर्णतया परिशोषणं कर्तुं प्रयत्नं कुर्वन्ति। अतः विश्वे अशांतिः उत्पद्यते। तादृश्याःअशान्तेः वारणाय विश्वशान्तिस्थापानाय च बहवः मार्गाः वर्तन्ते। शान्तेः अवाप्तये कोऽस्ति सुलभो मार्गः? इति न जानन्ति। तदर्थं अस्माकं पूर्वजाः अनेकान् मार्गान् सूचितवन्तः। ते कर्म भक्तिज्ञानमार्गाश्च। एतेषु भक्तिमार्गः अतिसुलभः। भक्तिमार्गेण जनानां मनसि स्नेहभावः उत्पद्यते द्वेषभावः निवर्तते। अनेन लोके शान्तिः संवर्धत एव। भक्तिशब्दस्य अर्थः प्रेम्णा भगवतः सेवैव वर्तते। अपि च सुदृढः सर्वतोधिक स्नेहोपि भक्तिरिति प्रोक्तः। भक्तिमार्गे स्थिताः जनाः प्रतिजीविषु दयां प्रकटयन्ति। मानवानां मध्ये स्नेहभावः उत्पद्यते । अनेन मार्गेण राष्ट्रभक्तिरपि उत्पद्यते। एवं जगति द्वेषभावदूरीकरणेन शान्तिं स्थपयितुं शक्नुमः। अतः भक्तिमार्गोपि विश्वशान्तिसंवर्धनाय राष्ट्रीय भावैक्यतायाः च सुलभोपायः वर्तते सैव अनुकरणीयः।

**भक्तेः परम्परा -**

संसारेस्मिन् सर्वोपि जीवः दुःख निवृत्ति पूर्वक सुखावाप्तये यततमानयेव वर्तते इति विवेकवताम् तिरोहितम्। परंतु भूयसाम् लोकः ऐन्द्रिय सुखे एव प्रवर्तते , नतु अतीन्द्रिये। पुनः केचन लौकिकं सुखम् नश्वरं मत्वा पारलोकिकमेव अन्वेशमाणाः वर्तन्ते। तदवाप्तये कोऽस्ति सुलभो मार्गः? इति नजानन्ति। अत एव वेदाः तां उद्दिश्य यज्ञ होमादि कर्माणि विधदति।

"क्षीणे पुण्ये मर्त्यलोकं विशन्ति"[1] इति श्रुति परामर्श्येन एतादृश कर्मसाध्यः स्वर्गादिरूपः सुकविशेषो अस्थिरः इति निश्चिन्वंतो मुमुक्षवः परमस्य श्रेयसः संपादिकायां आत्मजिज्ञासायाम् प्रवर्तते। वेदे लौकिकम् अलौकिकम् चेति सुखमुभयम् विषयम् विद्येते अतैव उच्चते। यतोहि – "पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्[2] (मनुस्मृतौ)"।

विदन्त्यनेन धर्म वेद, निश्रेयस कराणि कर्माणि आवेदयंति इति वेदाः। चतुर्णानाम् वेदानाम् अंतिमलक्षः मोक्ष एव। अत एव वदाः ज्ञानराशयः। वेदाः भारतीय संस्कृतेः अधारभूताः सर्वश्रेष्ठाः ग्रंथाः संति। वेदाः नकेवलं भारतीयानां अपितु सर्वासाम् मानव जातीनाम् प्रचीनाः ग्रंथाः सन्ति। आसहस्रात् पूर्वमेव अस्माकं भारत देशः विश्वेऽस्मिन् जगद्गुरुस्थानं प्राप्य प्रसिद्धः भवति। तत्कारणंतु – भारतस्य प्रतिष्ठेद्वे संस्कृतं संस्खृतिश्च इत् उक्तिः भारतस्य तथा संस्कृत भषायाः श्रेष्ठत्वं जेगीयते।

विष्णुपुराणे – "गायंतिदेवाः किलगीतकानि धन्यास्तु ये भारत भूमिभागे"[3]। इत्यादि श्लोकैः देवताभ्यः मानवेभ्यश्च स्वर्गसुखं तथा मोक्षपदं प्राप्तुं भारत भूमिरेव साधनम् अश्रयन्च वर्तेते इति देवगन्धर्वाः गायन्ति।

यतोहि समग्रेऽपिविश्वः अज्ञान वितान छायायां गाढं स्वपतिस्म तदा ज्ञानसूर्योयस्य प्रकरप्रकाशपुंजम् द्रष्टवंतः भारतीयाः। सैव अस्माकम् सनातन संस्कृतिः अद्यापि अविछि्चन्नतया राराजते। यदा सर्वत्र जगति अज्ञान वृत्तिः आसीत् तदा ज्ञानदीपेन प्रकाशं वितरतवान् वेदराशिः। सायेव वैदिकप्रधाना संस्कृतिः अद्यापि यदि दृश्यते चेत् तत्कारणं तावत् धर्मः ज्ञानं संस्कृत भाषाच संस्कृतिः धर्मप्रधाना। श्रुति स्मृतयः, पुराण ग्रंथाः शास्त्राणि, दर्शन ग्रंथाश्च अस्याः धर्मसंस्कृतेः आकर ग्रंथाः। अस्याः भारतीय संस्कृतेः अधारभूताः सर्वश्रेष्ठाग्रंथाः वेदाः सन्ति।

अत एव उच्यते – "वेदोखिलोधर्ममूलः"[4] इति। आचार्य सायणस्तु "प्रत्यक्षानुमानाभ्यम् यस्य वस्तुतः सिद्धिः नजायते तदर्थं वेदानामेव अवोचत्"।

---

[1] श्रीधर स्वामी टीका, १८७६, श्रीमद् भगवद्गीता, कल्कत्ता नगर, सरस्वती यन्त्रे मुद्रित।

[2] चक्रकोडि ईश्वरशास्त्रि, १९६९, मनुस्मृति, धारवाड, समाज पुस्थकालय।

[3] विद्वान् रङ्गनाथशर्म, २०११, श्रीविश्णुपुराणम्, बेङ्गळूरु, श्रीरामकृष्ण मठ।

[4] मनुस्मृति सार, २-२, पुट-७।

प्रत्यक्षेणामित्याव यस्तूपयो नविद्यते ।
एवं विंदंतिवेदेन तस्माद् वेदस्य वेदता ॥[5]

वेदेस्मिन् जीवानाम् उद्धर्तुम् अन्तिमोलक्षः परमपुरुषार्तः आत्मज्ञानमेव इत्युच्चते तदर्थं अध्यात्म चिंतनं कर्तव्यमिति श्रूयते। अध्यात्म चिंतनं न सर्वेषां सुखकरम्। यतः केषांचित् पूर्वजन्म संस्कारबलेन कौमार एवैतत् संपद्येत केशांचित् स्थाविरे। केचनपरम् नास्तिकाः स्वीय जीवनावधि आद्यात्मिकं अर्थं अद्यवसितुं न प्रयतेरन्। आस्तिकाः परं अध्यात्म चिंतनायां प्रवर्तन्ते। तादृश परम पुरुषार्थं प्राप्तुं त्रीणि सधनानि सन्ति। तानि कर्म भक्ति ज्ञानन्चेति। केचनाः कर्म उपासनम् (भक्तिः)। ज्ञानंचेति अंगीकुर्वंति। परंतु अत्र परमसुखं मोक्षं प्राप्तुं सुलभोमार्गः का इति विचार्यमाणे भक्तिः इति सर्वैः अन्गीक्रियन्ते।

भक्तिस्वरूप विमर्शः –

भक्तिः साध्यरूपा साधनरूपा चास्ति। यथा प्रसादं अधिरोढुं इछ्चुना मानवेन अन्तिमस्य सोपानस्य प्राप्तये प्राथमिकानि सोपानानि लङ्घनियानि भवन्ति। तथैव प्रभुपाद पद्मं प्राप्तु मिच्छुमा साधकेन साध्यरूपां भक्तिं प्रप्तुं भक्तेः अङ्गानि अनुष्ठेयानि वर्तन्ते। नारद भक्ति सूत्रानुसारं "सा त्वस्मिन् परमाप्रेमरूपा" [6] इति। नाम भगवती अत्यन्तन्तं अनुरागमेव भक्ति इति कथ्यते। तथा नारद भक्ति सूत्रानुसारं "सनकादयो मुक्तेः फलं भक्तिमेव मन्यन्ते।" यतो हि तन्मते भक्तिः स्वयमेवास्ति फलं स्वयं फलरूपेनि ब्रह्मकुमारः। भगवत् सेवार्थं मोक्षमपि उपेक्षमाणा निर्गुणा भक्ता भगवद्भक्तिमेव स्वकीयं परमं पुरुषार्थं मन्यन्ते? भक्तिरियं साध्यावस्थास्ति। अवस्यां अवस्थायां भक्ता गुणत्रयं अतिक्रम्य भगवद्भावं अरोहन्ति।

एवं भूता भक्त देवर्षिणा नारदेन एकान्तिनः श्रेष्टाश्च प्रोक्ताः "भक्ता एकान्तिनो मुख्याः"[7](६७)।

गीतायां यत्र भगवता श्रीकृश्णेन "नैस्त्रैगुण्याय भक्तप्रवरः पार्थः प्रोक्तः"[8], तत्र तस्या अयं अभिप्रायः यदस्या एव साध्यरूपाः भक्ते प्राप्तिरवश्यं विधेय। अत एव भक्तिः साधन साध्योभय रूपा सिध्यति। तत्र सध्यावस्थायां ज्ञानकर्मायोगादीनि भक्तेः साधनानि – साधनरूपेणच भक्तेः साध्यः परमानन्द स्वरूपा परमत्मैव। एवं देवर्षिणा नारदेन परम प्रेमा भक्तिः स्वीकृता, शाण्डिल्येन महर्षिणातु स्वसूत्रे "ईश्वरे पराकाष्ठाया अनुरक्तिरेव भक्तिः प्रोक्ता"[9]।

यस्यदेवे परा भक्तिः यथादेवे तथागुरौ। तस्येते कथिथाह्यर्थाः प्रकाशंते महात्मनः। (श्वेताष्वतरोपनिशत्) श्रुतिप्रमाणम्।[10]

मद्भक्ता येतद् विज्ञाय मद्भावायोपपद्यते।[11]

चतुर्विधा भजन्त्येमाम् .....इत्यादीनि स्मृतिवाक्यानि अपि इमं अर्थं प्रतिपादयन्ति।[12]

अतः भक्तिः सर्वतो गरीयसी। उपासना मूलम् भक्तिरेवेति केचनः, चित्तशुद्धौ सत्यां भक्तिजिज्ञासां अवश्यम् कर्तव्य। विहितकर्मानुष्ठानेन चित्तशुद्देरनंतरमेव भक्तेःजिज्ञासाया अधिकारो जगर्ति। इत्येवम् अभिप्रेत्य एवमुक्तं महर्षिण 'शाण्डिल्येन' 'शाण्डिल्य भक्तिसूत्रे' – अथातो भक्तिजिज्ञासा[13] (१.१) इति।

---

[5] कृश्णयजुर्वेदियतैत्तरीयसंहिता, पुट सं - २।

[6] Naradabhaktisutra, ।सूत्रं २, Page 5 ।

[7] Naradabhaktisutra, सूत्रं ६७, Page 131।

[8] श्रीमद् भगवद्गीता, श्लोक संख्या २-४५ ।

[9] स्वामि हर्षानन्द, २०००, शाण्डिल्य भक्तिसूत्रगळु, मैसूरु, श्रीरामकृष्णाश्रम् पुट संख्या – २।

[10] श्वेतश्वेतरोपनिषद्, ६-२३, पुट संख्या ८६

[11] श्रीधर स्वामी टीका, १८७६, श्रीमद् भगवद्गीता, कल्कत्ता नगर, सरस्वती यन्त्रे मुद्रित, श्लोक संख्या १३-१८।

[12] श्रीधर स्वामी टीका, १८७६, श्रीमद् भगवद्गीता, कल्कत्ता नगर, सरस्वती यन्त्रे मुद्रित, श्लोक संख्या ७-१६।

[13] श्री नाराणतीर्थ, १९९८, शांडिल्य भक्तिसूत्रम्, वाराणासि, सूत्रं - १,सम्पूर्णानन्द विस्श्वविद्यालयः, पुटः३-४।

वस्तुतः त्रयाणां एतेषां भक्तिज्ञान कर्मणां समन्वयद्वारा सम्यक् सिद्दि प्राप्तिः प्रशस्ताप्रोच्यते। तत्र कर्म चित्तशुद्दिमात्रसाधनम्। ज्ञानस्य बहिरंगसाधनं भक्तिः (अथवा उपासनन्च) 'श्रवणादि कालेपि' अनुवर्तमानं सत् स्वयमंतरंगतमं साधनम् इति अनयोः भेदः। एषां त्रयाणां समन्वयः पूततमः त्रिवेणिसंगम इव जीव परमात्मानं उपस्थाप्य संसार सागरात् विमोचयति। अतो मानव जीवनस्य सापल्याय मनुष्ययोनि जन्मलाभस्य च चर्मलक्ष्यमोक्ष्योपलब्धये त्रयाणांमप्येषां अनुष्टानं अत्यमवष्यकम्। त्रिषु एषु एकस्य कस्यापि अभाव इष्टसिद्धेः प्रतिरोधकः। अथ एवैषां समन्वय मार्ग एव सर्वेषां श्रेयस्कर इति मुख्यो वैदिक सिद्धांतः। वेदान्तिनश्च ज्ञानमेव मोक्षस्य मुख्य साधनं मत्वा कर्म केवलम् भुद्धिशुद्धिप्रयोजकं गौणं साधनं इति स्वीकुर्वन्ति।

मानवजीवनस्य सार्थक्यं धर्मार्थकाममोक्षेति चतुर्वर्गस्य साधनेन सिध्यति। सामान्यमानवाः वैदेशिकाः त्रिवर्गसाधने एव चिंतयन्ति। परमपुरुषार्थस्तु मोक्ष एवेति भारतीयानाम् चिन्तनम् । मोक्षप्राप्तेरनन्तरं पुनर्जन्म न विद्यते।

धर्मार्थ काममोक्षाख्येषु चतुर्विध पुरुषार्थेषु मोक्ष एव परम पुरुषार्थः।[14] इति श्रुतिरेव प्रमाणम्।

मुक्तस्तु सदा रमते। अतो मुक्तेः सोपानानि बहुभिरन्विष्टानि। तदर्थमेव भगवद्गीतायाम् कर्म – भक्ति – ज्ञानयोगाः प्रतिपादिताः। मोक्षसाधनसामग्र्याम् भक्तिरेव गरीयसी [15]इति शंकरोक्तिः। भक्तिश्च तत् साधनानि इति मध्वाः।

अथ का भक्तिः, तत् स्वरूपम् किम्, विश्वशान्तौ तस्य पात्रं किम्? इति विचारयामः। भज सेवायाम् इति धातोः भावे "क्तिन्" प्रत्ययेन निष्पन्नस्य भक्तिशब्दस्य अर्थः प्रेम्णा भगवतः सेवैव प्रतीयते। यथा वृक्षस्य पूर्णता फलेन भवति तथैव भक्तिरपि पूर्णता परमप्रेमास्पदे भगवति परमेण प्रेम्णैव निष्पद्यते। तस्मात् भगवति जगदीश्वरे अनन्यानुराग एव भक्तिरिति निस्सरति भक्तिलक्षण निष्कर्षः । एतादृश्या भक्त्या भगवान् भक्तेभ्यः स्वपदानि ददाति। मुक्तिं ददाति इत्यर्थः।

उदा-

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्वतः।

ततो माम् तत्वतो ज्ञात्वा विशते तदनंतरम् ॥ [15] भगवद्गीता १८_५५

आत्मा रामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।

कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणैर्हरिः॥[16] भागवत १_७_१०

भक्ति लक्षणंतु शाण्डिल्यभक्ति सूत्रे – "सा परानुरक्तिरीश्वरे"[17] इति। "सात्वस्मिन् परमप्रेमरूपा"[18] इति नारदभक्तिसूत्रे। क्षणमपि भगवद्वियोगासहिश्ष्णुत्वम् भक्तिरित्यभिधीयते।(आङ्गीरसः)

अर्थात् क्षणमपि भगवन्तं त्यक्त्वा न भवितुम् अशक्या मनसः स्थितिः भक्तिः। एवं भगवतो महात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः स्नेहो भक्तिरिति प्रोक्तः।

भारतीयप्रेमपद्धतौ प्रेम अनेकेषु रूपेषु अभिव्यक्तं भवति।

1. मित्रयोः परस्परं प्रेम।
2. पति - पत्न्योः अन्योन्यं प्रेम।
3. पितापुत्रयोः इतरेतरम् आश्रयं प्रेम।
4. राष्ट्रसेवायां राष्ट्रप्रेम।

एवं राष्ट्रसेवाऽपि नवविधभक्तौ अन्तर्भवति। तादृश्याः राष्ट्रभक्तेः उत्पादनेन प्रजासु स्वराष्ट्ररक्षणाबुद्धिः परराष्ट्राणां हितकारिणी मतिः वर्धते। नव विधभक्तिस्तु –

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥ भागवते ७_५_२३

अयं श्लोकस्तु राष्ट्रभक्तिइत्युक्तायाम् –

[14] स्वामि आदिदेवानन्द, १९८९, छान्दोग्योपनिषत्, मैसूरु, श्रेए रामकृष्णाश्रम, मंत्र संख्या ०८-१५-०१।

[15] श्रीधर स्वामी टीका, १८७६, श्रीमद् भगवद्गीता, कल्कत्ता नगर, सरस्वती यन्त्रे मुद्रित, श्लोक संख्या १८-५५।

[16] श्रीमद्भागवत महापुराणम्, श्लोक संख्या १-७-१०, पुट संख्या ७१।

[17] शाण्डिल्य भक्तिसूत्रगळु, पुट संख्या ९।

[18] Naradabhaktisutra, ।सूत्रं २, Page ६

श्रवणं कीर्तनं स्वदेश भक्त स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्म समर्पणम्॥

अनया स्नेहमत्या देशे विदेशेऽपि परस्परस्वार्थबुद्धि विनाशनेन द्वेषमतिप्रणाशनेन च परस्परस्नेहमिलनेन सद्बुद्धेः विकासेन च विश्वशान्तिः भवत्येव।

राष्ट्ररक्षणार्थं हुतात्मवीरदेशभक्तान् स्मरामः स्मारयामः – 'चाणक्य मति गुप्तं – चंद्रगुप्तं,' 'विहितौचित्यं वीरविक्रमादित्यं', 'संग्रामसिंहं – वीरसंग्रामसिंहं,' 'प्रतितप्रतापं – राणाप्रतापं, शक्तिस्वरूपिणीं - झान्सी लक्ष्मीराणीं,' 'स्वधर्मानुरागिणं वंद्वैरागिणं देशभक्तशेखरं – श्रीचंद्रशेखरं,' 'स्वतन्त्र्ययुद्धसिंहं – वीरभगतसिंहं,' 'भारत भूतिलकं - लोकमान्य तिलकं,' 'सर्वथा सुभाषं - नेताजी सुभाषं,' संचिन्त्य एषां पावनानि चरित्राणि च संस्मृत्य कस्य नाम पाषाणहृदयस्य जनस्य मनो देशभक्तिरसेन परिप्लुतं न भवेदिति। अतः भक्ति मार्गः विश्वे शान्ति स्थापनाय राष्ट्रीय भावैक्यतायां वर्धनायच सुलभो मार्गः भवति। तस्मात् सर्वविध साधन मार्गे अग्रेसरतां समेषां साधकानां सफलता प्राप्तये समपेक्षितत्वात् भगवद्भक्तिरवश्यं समाश्रयणीया, आदरणीया, मनोवक्काय कर्मभिः सम्माननीया च वर्तते।

यथा समस्तलोकानां जीवनं सलिलं स्मृतम् ।
तथा समस्तसिद्धीनां जीवनं भक्तिरुच्यते॥
इति शिवम्।

## संदर्भ सूची


1. श्रीधर स्वामी टीका, १८७६, श्रीमद् भगवद्गीता, कल्कत्ता नगर, सरस्वती यन्त्रे मुद्रित।
2. चक्रकोडि ईश्वरशास्त्रि, १९६९, मनुस्मृति, धारवाड, समा ज पुस्थकालय।
3. विद्वान् रङ्गनाथशर्मा, २०११, श्रीविश्णुपुराणम्, बेङ्गळूरु, श्रीरामकृष्ण मठ।
4. एन्. के,नरसिंहमूर्ति, १९७५, मनुस्मृति सार, बेङ्गळूरु, प्रभा मुद्रणालय।२-२ पुट-७
5. वे. शा. सं. काशीनाथशास्त्रि आगाशे इत्येतैः संशोधितम्, १९४०, कृश्णयजुर्वेदियतैत्तरीयसंहिता, पूणा, आनन्दाश्रम मुद्रणालय।
6. Swami Chinmayananda, 2013, Naradabhaktisutra, Mumbai Chinmaya Prakashan 67 page no 131
7. स्वमि आदिदेवानन्द, १९८१, श्वेतश्वेतरोपनिषद्, मैसूरु, श्रीरामकृष्णाश्रम। ६-२३ पुट संख्या ८६
8. श्री नाराणतीर्थ, १९९८, शांडिल्य भक्तिसूत्रम्, वारणासि, सूत्रं - १,सम्पूर्णानन्द विस्श्वविद्यालयः, पुटः३-४।
9. स्वामि हर्षानन्द, २०००, शाण्डिल्य भक्तिसूत्रगळु, मैसूरु, श्रीरामकृष्णाश्रम् पुट संख्या – २।
10. लक्ष्मणदास वेलणकर्, २००७, श्रीमद्भागवत महापुराणम्, गोरखपुर, गेएताप्रेस्, श्लोक संख्या १-७-१०, पुट संख्या ७१।